# ॥ वाल्मीकि रामायण॥

## २ अयोध्याकाण्ड

### अध्याय ६८

तां तथा गर्हयित्वा तु मातरं भरतस्तदा ।
रोषेण महताविष्टः पुनरेवाब्रवीद्वचः ॥ १॥

राज्याद्भ्रंशस्व कैकेयि नृशंसे दुष्टचारिणि ।
परित्यक्ता च धर्मेण मा मृतं रुदती भव ॥ २॥

किं नु तेऽदूषयद्राजा रामो वा भृशधार्मिकः ।
ययोर्मृत्युर्विवासश्च त्वत्कृते तुल्यमागतौ ॥ ३॥

भ्रूणहत्यामसि प्राप्ता कुलस्यास्य विनाशनात् ।
कैकेयि नरकं गच्छ मा च भर्तुः सलोकताम् ॥ ४॥

यत्त्वया हीदृशं पापं कृतं घोरेण कर्मणा ।
सर्वलोकप्रियं हित्वा ममाप्यापादितं भयम् ॥ ५॥

त्वत्कृते मे पिता वृत्तो रामश्चारण्यमाश्रितः ।
अयशो जीवलोके च त्वयाहं प्रतिपादितः ॥ ६॥

मातृरूपे ममामित्रे नृशंसे राज्यकामुके ।
न तेऽहमभिभाष्योऽस्मि दुर्वृत्ते पतिघातिनि ॥ ७॥

कौसल्या च सुमित्रा च याश्चान्या मम मातरः ।
दुःखेन महताविष्टास्त्वां प्राप्य कुलदूषिणीम् ॥ ८॥

न त्वमश्वपतेः कन्या धर्मराजस्य धीमतः ।
राक्षसी तत्र जातासि कुलप्रध्वंसिनी पितुः ॥ ९॥

यत्त्वया धार्मिको रामो नित्यं सत्यपरायणः ।
वनं प्रस्थापितो दुःखात्पिता च त्रिदिवं गतः ॥ १०॥

यत्प्रधानासि तत्पापं मयि पित्रा विनाकृते ।
भ्रातृभ्यां च परित्यक्ते सर्वलोकस्य चाप्रिये ॥ ११॥

कौसल्यां धर्मसंयुक्तां वियुक्तां पापनिश्चये ।
कृत्वा कं प्राप्स्यसे त्वद्य लोकं निरयगामिनी ॥ १२॥

किं नावबुध्यसे क्रूरे नियतं बन्धुसंश्रयम् ।
ज्येष्ठं पितृसमं रामं कौसल्यायात्मसम्भवम् ॥ १३॥

अङ्गप्रत्यङ्गजः पुत्रो हृदयाच्चापि जायते ।
तस्मात्प्रियतरो मातुः प्रियत्वान्न तु बान्धवः ॥ १४॥

अन्यदा किल धर्मज्ञा सुरभिः सुरसंमता ।
वहमानौ ददर्शोर्व्यां पुत्रौ विगतचेतसौ ॥ १५॥

तावर्धदिवसे श्रान्तौ दृष्ट्वा पुत्रौ महीतले ।
रुरोद पुत्र शोकेन बाष्पपर्याकुलेक्षणा ॥ १६॥

अधस्ताद्व्रजतस्तस्याः सुरराज्ञो महात्मनः ।
बिन्दवः पतिता गात्रे सूक्ष्माः सुरभिगन्धिनः ॥ १७॥

तां दृष्ट्वा शोकसन्तप्तां वज्रपाणिर्यशस्विनीम् ।
इन्द्रः प्राञ्जलिरुद्विग्नः सुरराजोऽब्रवीद्वचः ॥ १८॥

भयं कच्चिन्न चास्मासु कुतश् चिद्विद्यते महत् ।
कुतो निमित्तः शोकस्ते ब्रूहि सर्वहितैषिणि ॥ १९॥

एवमुक्ता तु सुरभिः सुरराजेन धीमता ।
पत्युवाच ततो धीरा वाक्यं वाक्यविशारदा ॥ २०॥

शान्तं पातं न वः किं चित्कुतश्चिदमराधिप ।
अहं तु मग्नौ शोचामि स्वपुत्रौ विषमे स्थितौ ॥ २१॥

एतौ दृष्ट्वा कृषौ दीनौ सूर्यरश्मिप्रतापिनौ ।
वध्यमानौ बलीवर्दौ कर्षकेण सुराधिप ॥ २२॥

मम कायात्प्रसूतौ हि दुःखितौ भार पीडितौ ।
यौ दृष्ट्वा परितप्येऽहं नास्ति पुत्रसमः प्रियः ॥ २३॥

यस्याः पुत्र सहस्राणि सापि शोचति कामधुक् ।
किं पुनर्या विना रामं कौसल्या वर्तयिष्यति ॥ २४॥

एकपुत्रा च साध्वी च विवत्सेयं त्वया कृता ।
तस्मात्त्वं सततं दुःखं प्रेत्य चेह च लप्स्यसे ॥ २५॥

अहं ह्यपचितिं भ्रातुः पितुश्च सकलामिमाम् ।

वर्धनं यशसश्चापि करिष्यामि न संशयः ॥ २६॥

आनाययित्वा तनयं कौसल्याया महाद्युतिम् ।
स्वयमेव प्रवेक्ष्यामि वनं मुनिनिषेवितम् ॥ २७॥

इति नाग इवारण्ये तोमराङ्कुशचोदितः ।
पपात भुवि सङ्क्रुद्धो निःश्वसन्निव पन्नगः ॥ २८॥

संरक्तनेत्रः शिथिलाम्बरस्तदा
विधूतसर्वाभरणः परन्तपः ।
बभूव भूमौ पतितो नृपात्मजः
शचीपतेः केतुरिवोत्सवक्षये ॥ २९॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com